# पञ्चमः पाठः

# प्रहेलिकाः

(सन्धि)

[सभी भाषाओं में बौद्धिक विकास के लिए पहेलियों की परम्परा रही है। संस्कृत में भी अनेक पहे प्राचीन काल से प्रचलित रही हैं और आज भी जोड़ी जा रही हैं। इनसे श्रोताओं का बौद्धिक व्यायाम है। पत्र-पत्रिकाओं में भी नई-नई पहेलियाँ दी जाती हैं। प्रस्तुत पाठ में ऐसी पाँच पहेलियाँ पद्य-बद्ध में दी गयी हैं जिनसे पाठकों का मनोरंजन होगा।]







अपदो दूरगामी च
साक्षरो न च पण्डितः।
अमुखः स्फुटवक्ता च
यो जानाति स पण्डितः ॥1॥

न तस्यादिः न तस्यान्तः
मध्ये यस्तस्य तिष्ठति।
ममाप्यस्ति तवाप्यस्ति
यदि जानासि तद् वद ॥2॥

नान्नं फलं वा खादामि
न पिबामि जलं क्वचित् ।
चलामि दिवसे रात्रौ
समयं बोधयामि च ॥3॥
मुखं कृष्णं वपुः क्षीणं
मञ्जूषायां च संवृतम् ।
घर्षणं मे दहत्याशु
रसवत्यां वसाम्यहम् ॥4॥
तिष्ठामि पादेन बको न पङ्गुः
दाता फलानां न कृतिर्न यत्नः ।
मौनेन जीवामि मुनिर्न मूकः
सेव्योऽस्मि कोऽहं नृपतिर्न देवः ॥5॥

## शब्दार्थः

| | | |
|---|---|---|
| अपदः | = | बिना पैर वाला |
| दूरगामी | = | दूर जाने वाला |
| पण्डितः | = | विद्वान् |
| साक्षरः | = | अक्षरयुक्त, पढ़ा हुआ |
| अमुखः | = | बिना मुख वाला |
| स्फुटवक्ता | = | स्पष्ट बोलने वाला |
| यः | = | जो |
| जानाति | = | जानता है |
| तस्यादिः ( तस्य+आदिः ) | = | उसका आरंभ |
| तस्यान्तः ( तस्य+अन्तः ) | = | उसका अंत |

| | | |
|---|---|---|
| मध्ये | = | बीच में |
| ममाप्यस्ति ( मम+अपि+अस्ति ) | = | मुझे भी है |
| तवाप्यस्ति | = | तुम्हें भी है |
| वद | = | कहो, बोलो |
| नान्नम् ( न+अन्नम् ) | = | अन्न नहीं |
| क्वचित् | = | कहीं |
| चलामि | = | चलता हूँ |
| दिवसे | = | दिन में |
| रात्रौ | = | रात में |
| बोधयामि | = | बतलाता हूँ |
| कृष्णम् | = | काला |
| वपुः | = | शरीर |
| क्षीणम् | = | दुबला-पतला |
| मञ्जूषायाम् | = | पेटिका में, पेटी में |
| संवृतम् | = | ढँका हुआ, बंद |
| घर्षणम् | = | रगड़ना |
| दहत्याशु ( दहति+आशु ) | = | शीघ्र जलता है |
| आशु | = | शीघ्र |
| रसवत्याम् ( रसवती, सप्तमी ) | = | रसोई में |
| वसाम्यहम् ( वसामि+अहम् ) | = | रहता / रहती हूँ |
| तिष्ठामि | = | ठहरता / ठहरती हूँ |
| पादेन | = | एक पैर से |

| | | |
|---|---|---|
| बकः | = | बगुला |
| पङ्गुः | = | लँगड़ा |
| दाता | = | दानी |
| फलानाम् | = | फलों का |
| कृतिः | = | कर्म |
| यत्नः | = | परिश्रम |
| मौनेन | = | चुप रहने से |
| जीवामि | = | जीता / जीती हूँ |
| मूकः | = | गूँगा |
| सेव्योऽस्मि ( सेव्यः+अस्मि ) | = | सेवन करने योग्य हूँ |
| कोऽहम् ( कः+अहम् ) | = | मैं कौन हूँ |
| नृपतिः | = | राजा |
| देवः | = | देवता |

(प्रहेलिका-संङ्केताः - पत्रपुटम्, नयनम्, घटिका, अग्निशलाका, वृक्षः)

## व्याकरणम्

### सन्धि-विच्छेदः

तस्यादिः = तस्य + आदिः (दीर्घसन्धिः)

तस्यान्तः = तस्य + अन्तः (दीर्घसन्धिः)

| | | |
|---|---|---|
| ममाप्यस्ति | = | मम + अपि + अस्ति (दीर्घ, यण्सन्धिः) |
| तवाप्यस्ति | = | तव + अपि + अस्ति (दीर्घ, यण्सन्धिः) |
| नान्नम् | = | न + अन्नम् (दीर्घसन्धिः) |
| दहत्याशु | = | दहति + आशु (यण्सन्धिः) |
| कृतिर्न | = | कृतिः + न (विसर्गसन्धिः) |
| मुनिर्न | = | मुनिः + न (विसर्गसन्धिः) |
| सेव्योऽस्मि | = | सेव्यः + अस्मि (विसर्गसन्धिः) |
| कोऽहम् | = | कः + अहम् (विसर्गसन्धिः) |
| नृपतिर्न | = | नृपतिः + न (विसर्गसन्धिः) |

**प्रकृति-प्रत्यय-विभागः**

| | | |
|---|---|---|
| जानाति | = | √ज्ञा , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| तिष्ठति | = | √स्था , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| खादामि | = | √खाद् , लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| पिबामि | = | √पा , लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| चलामि | = | √चल् , लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| बोधयामि | = | √बुध् + णिच्, लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| संवृतम् | = | सम् + √वृ + क्त, नपुंसकलिङ्गम्, एकवचनम् |
| दहति | = | √दह् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| जीवामि | = | √जीव् , लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| वसामि | = | √वस् , लट्लकारः, उत्तमपुरुषः, एकवचनम् |

# अभ्यासः

## मौखिकः

1. अधोलिखितानां पदानाम् उच्चारणं कुरुत -

अपदः, स्फुटवक्ता, तस्यादिः, तस्यान्तः, यस्तस्य, ममाप्यस्ति, तवाप्यस्ति, सेव्योऽस्मि, कोऽहम्, नृपतिर्न, मञ्जूषायाम् ।

2. निम्नलिखितानां पदानाम् अर्थं वदत -

अपदः, तस्यादिः, ममाप्यस्ति, मूकः, कृष्णम्, घर्षणम्, मञ्जूषायाम्, दहत्याशु, रसवत्याम् ।

3. स्वमातृभाषायाम् एकां प्रहेलिकां वदत ।

4. निम्नलिखितानां धातु-रूपाणां पाठं कुरुत -

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अस्ति | स्तः | सन्ति |
| मध्यमपुरुषः | असि | स्थः | स्थ |
| उत्तमपुरुषः | अस्मि | स्वः | स्मः |

## लिखितः

5. निम्नलिखितानां प्रश्नानाम् उत्तरम् एकपदेन लिखत -

(क) वयं काभ्यां पश्यामः ?

(ख) का भोजनं न करोति ?

(ग) कस्य आदौ अन्ते च 'न' भवति ?

(घ) मुखेन विना कः वदति ?

(ङ) पत्रवाहकः किं वितरति ?

(च) का फलं न खादति ?

(छ) घर्षणेन का दहति ?

6. मञ्जूषायाः उचितपदानि चित्वा वाक्यानि पूरयत -

| अन्तः, | जीवामि, | पादेन, | पिबामि, | कृष्णम्, | समयं, | पण्डितः |
|---|---|---|---|---|---|---|

(क) साक्षरो न च .................................... ।

(ख) न तस्यादिः न तस्य .................................... ।

(ग) तिष्ठामि .................................... बको न पङ्गुः ।

(घ) मौनेन .................................... मुनिर्न पुङ्गु ।

(ङ) न .................................... जलं क्वचित् ।

(च) चलामि दिवसे रात्रौ .................................... बोधयामि ।

(छ) मुखं .................................... वपुः क्षीणम् ।

7. विपरीतार्थकशब्दयोः सुमेलनं कुरुत -

| अ | | आ |
|---|---|---|
| (क) इतः | - | (i) न |
| (ख) उपरि | - | (ii) अन्तः |
| (ग) आम् | - | (iii) ततः |
| (घ) आदिः | - | (iv) अधः |
| (ङ) मम | - | (v) यदा-कदा |
| (च) निरन्तरम् | - | (vi) तव |

8. उदाहरणानुसारं रिक्तस्थानं पूरयत -

| उत्तमपुरुषः | | मध्यमपुरुषः |
|---|---|---|
| यथा - वदामि | - | वदसि |
| (i) जानामि | - | .................. |
| (ii) पिबामि | - | .................. |
| (iii) .................. | - | वससि |
| (iv) .................. | - | बोधयसि |
| (v) खादामि | - | .................. |

**9. उदाहरणानुसारेण वचनपरिवर्तनं कुरुत -**

| एकवचनम् | | द्विवचनम् |
|---|---|---|
| यथा- खादति | = | खादतः |
| (क) चलामि | = | ............................ |
| (ख) लिखसि | = | ............................ |
| (ग) पठिष्यति | = | ............................ |
| (घ) अस्ति | = | ............................ |
| (ङ) दहति | = | ............................ |
| (च) वसामि | = | ............................ |
| (छ) तिष्ठसि | = | ............................ |

**10. वाक्यनिर्माणं कुरुत -**

देवः, वृक्षः, नयनम्, पत्रम्, चलामि, पठसि, खादति, फलम् ।

**11. एतेषु किं 'सत्यम्' 'असत्यम्' वा, लिखत -**

यथा- वृक्षः फलं ददाति - सत्यम्

(क) मत्स्याः तडागे निवसन्ति ........................

(ख) शिवः त्रिनेत्रधारी कथ्यते ........................

(ग) बकाः मत्स्यान् न खादन्ति ........................

(घ) घटिका समयं बोधयति ........................

(ङ) अग्निशलाका घर्षणेन दहति ........................

**12. अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत -**

दहत्याशु, कोऽयम्, नृपतिर्न, सेव्योऽस्मि, तस्यान्तः, तवाप्यस्ति ।

**13. संस्कृते अनुवादं कुरुत -**

(क) कुन्तल विद्यालय कब (कदा) जाएगा ?

(ख) शीला और रहीम कब आएँगे ?

(ग) वे लोग मिठाई खाएँगे ।

(घ) मैं विद्यालय जाऊँगा ।

(ङ) गर्मी में नदियाँ सूख जाएँगी ।

(च) अब (इदानीम्) तुम क्या करोगे ?

(छ) हमलोग राजगीर जाएँगे ।

## योग्यता-विस्तार:

संसार की सभी भाषाओं में बौद्धिक व्यायाम के लिए पहेलियाँ बहुत दिनों से प्रचलित हैं। एक पीढ़ी से दूसरी पीढ़ी में ये पहेलियाँ चलती जाती हैं । इन्हें मनोरंजन का भी एक साधन बनाया गया है । भारतीय भाषाओं में सबसे प्राचीन संस्कृत में पद्यात्मक पहेलियों की बहुत बड़ी संख्या मिलती है । इनका उत्तर खोजने में श्रोताओं को बहुत अधिक माथा-पच्ची करनी पड़ती है, किन्तु बौद्धिक विकास के लिए ये आवश्यक हैं । यहाँ कुछ अतिरिक्त पहेलियाँ दी जाती हैं-

1. सुप्तोऽपि नेत्रे न निमीलयामि<br>
  जलस्य मध्ये निवसामि नित्यम् ।<br>
  स्वजातिजीवा मम भोजनानि<br>
  वदन्तु मान्याः ! मम नामधेयम् ॥

  अर्थात् सोते हुए भी मैं अपनी आँखें नहीं बंद करता । मैं सदा जल में रहता हूँ । अपनी जाति के जीवों को ही खाता हूँ । क्या आप मेरा नाम बताएँगे ? (मैं मत्स्य अर्थात् मछली हूँ।)

2. वृक्षाग्रवासी न च पक्षिराजः<br>
  त्रिनेत्रधारी न च शूलपाणिः ।<br>
  त्वग्वस्त्रधारी न च सिद्धयोगी<br>
  जलं च बिभ्रन्न घटो न मेघः ॥

  अर्थात् वृक्ष के ऊपर रहता हूँ किन्तु पक्षिराज (गरुड़) नहीं हूँ । मेरी तीन आँखें हैं किन्तु शिव नहीं हूँ । छाल का वस्त्र मेरे ऊपर है किन्तु मैं सिद्ध योगी नहीं हूँ । जल धारण करते हुए भी न मैं घड़ा हूँ न मेघ । (सोचिए मैं कौन हूँ ? मैं नारियल का फल हूँ ।)

3. एकचक्षुर्न काकोऽयं बिलमिच्छन्न पन्नगः ।<br>
  क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः ॥

  अर्थात् इसकी एक आँख है किन्तु कौआ नहीं है । सदा बिल (छेद) में जाना चाहता है किन्तु साँप नहीं है । सदा घटता-बढ़ता है किन्तु न समुद्र है न चन्द्रमा । (बताएँ यह क्या है? यह कपड़ा सिलने वाली सूई है ।)

*****